श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकाशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकाशीतितमः सर्गः ॥

## शुक्रस्य शापेन सपरिवारस्य दण्डस्य तदीयराज्यस्य च विनाशः

स मुहूर्तादुपश्रुत्य देवर्षिरमितप्रभः।
स्वमाश्रमं शिष्यवृतः क्षुधार्तः सन्न्यवर्तत ॥ **7.81.1** ॥

सोऽपश्यदरजां दीनां रजसा समभिप्लुताम्।
ज्योत्स्नामिव ग्रहग्रस्तां प्रत्यूषे न विराजतीम् ॥ **7.81.2** ॥

तस्य रोषः समभवत् क्षुधार्तस्य विशेषतः।
निर्दहन्निव लोकांस्त्रीशिष्यांश्चैतदुवाच ह ॥ **7.81.3** ॥

पश्यध्वं विपरीतस्य दण्डस्याविदितात्मनः।
विपत्तिं घोरसङ्काशां क्रुद्धादग्निशिखामिव ॥ **7.81.4** ॥

क्षयोऽस्य दुर्मतेः प्राप्तः सानुगस्य दुरात्मनः।
यः प्रदीप्तां हुताशस्य शिखां वै स्प्रष्टुमर्हति ॥ **7.81.5** ॥

यस्मात् स कृतवान् पापमीदृशं घोरसंहितम्।
तस्मात् प्राप्स्यति दुर्मेधाः फलं पापस्य कर्मणः ॥ **7.81.6** ॥

सप्तरात्रेण राजासौ सपुत्रबलवाहनः।
पापकर्मसमाचारो वधं प्राप्स्यति दुर्मतिः ॥ **7.81.7** ॥

समन्ताद् योजनशतं विषयं चास्य दुर्मतेः।
धक्ष्यते पांसुवर्षेण महता पाकशासनः॥ **7.81.8** ॥

सर्वसत्त्वानि यानीह स्थावराणि चराणि च।
महता पांसुवर्षेण विलयं सर्वतोऽगमन्॥ **7.81.9** ॥

दण्डस्य विषयो यावत् तावत् सर्वं समुच्छ्रयम्।
पांसुवर्षमिवालक्ष्यं सप्तरात्रं भविष्यति॥ **7.81.10** ॥

इत्युक्त्वा क्रोधताम्राक्षस्तमाश्रमनिवासिनम्।
जनं जनपदान्तेषु स्थीयतामिति चाब्रवीत्॥ **7.81.11** ॥

श्रुत्वा तूशनसो वाक्यं सोऽऽश्रमावसथो जनः।
निष्क्रान्तो विषयात् तस्मात् स्थानं चक्रेऽथ बाह्यतः॥ **7.81.12** ॥

स तथोक्त्वा मुनिजनमरजामिदमब्रवीत्।
इहैव वस दुर्मेधे आश्रमे सुसमाहिता॥ **7.81.13** ॥

इदं योजनपर्यन्तं सरः सुरुचिरप्रभम्।
अरजे विज्वरा भुङ्क्ष्व कालश्चात्र प्रतीक्ष्यताम्॥ **7.81.14** ॥

त्वत्समीपे च ये सत्त्वा वासमेष्यन्ति तां निशाम्।
अवध्याः पांसुवर्षेण ते भविष्यन्ति नित्यदा॥ **7.81.15** ॥

श्रुत्वा नियोगं ब्रह्मर्षेः सारजा भार्गवी तदा।
तथेति पितरं प्राह भार्गवं भृशदुःखिता॥ **7.81.16** ॥

इत्युक्त्वा भार्गवो वासमन्यत्र समकारयत्।
तच्च राज्यं नरेन्द्रस्य सभृत्यबलवाहनम्॥ **7.81.17** ॥

सप्ताहाद् भस्मसाद् भूतं यथोक्तं ब्रह्मवादिना।
तस्यासौ दण्डविषयो विन्ध्यशैवलयोर्नृप॥ **7.81.18** ॥

शप्तो ब्रह्मर्षिणा तेन वैधर्म्ये सहिते कृते।
ततः प्रभृति काकुत्स्थ दण्डकारण्यमुच्यते ॥ **7.81.19** ॥

तपस्विनः स्थिता ह्यत्र जनस्थानमतोऽभवत्।
एतत् ते सर्वमाख्यातं यन्मां पृच्छसि राघव ॥ **7.81.20** ॥

सन्ध्यामुपासितुं वीर समयो ह्यतिवर्तते।
एते महर्षयः सर्वे पूर्णकुम्भाः समन्ततः ॥ **7.81.21** ॥

कृतोदका नरव्याघ्र आदित्यं पर्युपासते।
स तैर्ब्राह्मणमभ्यस्तं सहितैर्ब्रह्मवित्तमैः।
रविरस्तङ्गतो राम गच्छोदकमुपस्पृश ॥ **7.81.22** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकाशीतितमः सर्गः ॥